॥ श्रीजिनाय नमः ॥

# ॥ मित्रानंदमंत्रिचरित्रम् ॥

(मूल अने भाषांतर सहित) (कर्ता—श्रीवर्धमानसूरि) (द्वितीयावृत्तिः)

—ःछपावी प्रसिद्ध करनारः—

पण्डित हीरालाल हंसराज—जामनगर.

( सने १९३५ ) मुद्रकः—श्रीजैनभास्करोदय प्रिन्टिंग प्रेस. (वीरसंवत् २४६१ )

किंमत ०–८–०

॥ श्रीजिनाय नमः ॥

# ॥ श्रीमित्रानंदचरित्रम् ॥

(कर्त्ता—श्रीवर्धमानसूरि)

भाषांतरकर्ता तथा छपावी प्रसिद्ध करनार—पण्डित श्रावक हीरालाल हंसराज (जामनगरवाला)

कुव्यापृतीनां स्नानादेस्त्यागो ब्रह्मव्रतं तपः । आहुः शिक्षाव्रतमिदं तृतीयं पौषधाभिधम् ॥१॥

अर्थः—कनिष्ट व्यापारोनो, तथा स्नान आदिकनो त्याग ब्रह्मचर्यव्रतनुं पालन, तथा तप, तेने पौषधनामनुं त्रीजुं शिक्षाव्रत कहेलुं छे ॥ १ ॥

तत्तु शुद्धोक्तचारित्रिव्रतवत्परिपाल्यते । अहोरात्रमथाशेषां रात्रिं यावज्जितेन्द्रियैः ॥ २ ॥

अर्थः—वळी ते पौषधव्रतने वर्णवेला शुद्ध दीक्षित मुनिना व्रतनीपेठे जितेंद्रियो एक रात्रिदिवस सुधी, अथवा समस्त रात्रि पर्यंत पाले छे. ॥ २ ॥

भवोरगमदच्छेदे पौषवत्पौषधव्रतम् । आपत्तापभिदे मित्रानन्दमन्त्रिपतेरिव ॥ ३ ॥

अर्थः—संसाररूपी सर्पना मदनो नाश करवामां पोषमास सरखुं पौषधव्रत मित्रानंद नामना मंत्रीश्वरनी पेठे दुःखना संतापनो नाश करनारुं छे. ॥ ३ ॥

धर्मनिर्मलमत्यर्थमर्थविद्योति विद्यते । पुरं पुष्पपुरं पुष्पचापचापलपेशलम् ॥ ४ ॥

अर्थः—ते मित्रानंदमंत्रिनुं उदाहरण नीचे प्रमाणे छे—धर्मथी निर्मल, अत्यंत द्रव्यना तेजवाळुं, तथा कामदेवनी चपलताथी मनोहर लागतुं पुष्पपुर नामनुं नगर छे ॥ ४ ॥

तत्र युद्धसुधासत्रममित्रवसुधाभृताम् । बभूव भूविभुर्भानुर्जितभानुः स्वतेजसा ॥ ५ ॥

अर्थः—ते नगरमां शत्रुराजाओने युद्धरूपी अमृतनी दानशाळा सरखो, तथा पोताना तेजथी सूर्यने पण जीतनारो भानुनामे राजा हतो ॥ ५ ॥

मन्त्री तस्य धरित्रीन्दोर्मित्रानन्द इति श्रुतः । अजायत धियां पात्रं छात्रीकृतबृहस्पतिः ॥६॥

अर्थः—ते राजाने बुद्धिना भाजन सरखो, तथा शिष्यरूप करेल छे बृहस्पतिने जेणे, एवो मित्रानंद नामनो प्रख्यात मंत्री हतो.

मध्येसदः कदाप्युच्चैर्नरेन्द्रसचिवेन्द्रयोः । व्यवसायस्य पुण्यस्य प्रतिष्ठानेऽभवत्कलिः ॥ ७ ॥

अर्थः—एक दिवसे मनमां ते राजा तथा मन्त्रीश्वरवच्चे उद्यमवाद तथा पुण्यवादना स्थापनाना संबंधमां क्लेश उत्पन्न थयो. ।७।

क्रुधाथ वसुधानाथः प्रोवाच सचिवं प्रति । व्यवसायः प्रमाणं न प्रमाणं पुण्यमेव चेत् ॥८॥

ततः स्वपुण्यमाहात्म्यात्त्वं पुण्यबलगर्वितः । गृहाण मन्न राज्यर्द्धिमित्थं संवर्धिमत्सरः ॥९॥

अर्थः—पछी ते राजाए क्रोधथी मंत्रीने कह्युं के, जो उद्यम प्रमाणभूत न होय, अने पुण्यज प्रमाणभूत होय, ॥ ८ ॥ तो पोताना पुण्यना माहात्म्यथी पुण्यना बलथी गर्विष्ट थयेलो तुं आरीते वृद्धि पातेला मत्सरवाळो थइने मारां राज्यनी समृद्धि लइ ले? ॥९॥

यश्च कश्चित्पुरीमध्याद्व्रजन्तमनुयास्यति । तत्कण्ठात्तृषितोऽसौ मत्खड्गः पास्यति शोणितम्॥१०॥

अर्थः—वळी जे कोइ नगरमांथी तारी पाछळ आवशे, तेना कंठमांथी मारी आ तरसी तलवार रुधिर पीशे. ॥ १० ॥

गच्छ तुच्छमते तूर्णं पूर्णं कुरु निजं वचः । गृहे न हन्त हन्तव्यमित एवान्यतो व्रज ॥ ११ ॥

अर्थः—हे तुच्छबुद्धि! तुं तुरत अहींथी चाल्यो जा? अने तारी शरत पूरी कर? वळी अरे! तारे हवे घेर पण न जवुं, अहींथीज बीजे क्यांक चाल्यो जा? ॥ ११ ॥

इति क्षितिपतेराज्ञां विज्ञाय सचिवाग्रणीः एकाक्येव दृढावेशोऽचलद्देशान्तरं प्रति ॥ १२ ॥

अर्थः—प्रथमज करेल भूगमन तथा आपत्तिमते अद्भुत उद्यमवाळो, तथा गिरींद्रनीपेठे उंचो, एवो ते मंत्री (पोताना) बन्ने पगोवडेज नगरमांथी निकळी चालवा लाग्यो. ॥ १२ ॥

पद्भ्यामेवादिभूचारविपद्भ्यामद्भुतोद्यमः । स निःससार नगरान्नगराज इवोन्नतः ॥१३॥

अर्थः–अत्यंत पुण्यशाली एवा ते मंत्रीए चालतां थकां अत्यन्त थाकी जतां मध्याह्नकाळे चंद्रनीपेठे क्रोडोगमे कलाओथी रचेलां एक सरोवरने जोयुं ॥ १३ ॥

गच्छन्नतुच्छपुण्योऽसौ श्रान्तो मध्यन्दिनेऽधिकम्। ददर्शेन्दोरिव कलाकोटीभिर्घटितं सरः॥१४॥

अर्थः–चपल मोजांओरूपी हाथोना समूहवाळुं जे तळाव, तृषातुरथयेला प्राणीओने जाणे बोलाववामाटे होय नही! तेम भमराओना गंभीर नादवाळां, कमलोना मिषथी क्रोडगमे मुखोने धारण करतु हतुं ॥ १४ ॥

यल्लोललहरीहस्तगणं भृङ्गघनस्वनाः। आह्वातुं तृषितान्वक्त्रकोटीरब्जच्छलाद्दधौ ॥ १५ ॥

अर्थः—ते तळावमां स्नानपान करीने पालपर वृक्षनी नीचे बेठेला ते मंत्रीए आगळ आकाशमांथी एकदम उतरेला (एक) पुरुषने जीयो. ॥ १५ ॥

स कृतस्नानपानोऽत्र स्थितः पाल्यां तरोस्तले। नभसो रभसोत्तीर्णमपश्यत्पुरुषं पुरः॥१६॥

अर्थः—आ मणि सन्ध्याकाळे तने वांछित सैन्य आपशे, अने पाछळथी पण तेने पूजवाथी ते घणी लक्ष्मी आपशे, ॥१६॥ एम

संध्यायां चिन्तितं सैन्यं दास्यत्येष मणिस्तव। पश्चादपि श्रियं भूरि पूरयिष्यति पूजितः॥१७॥

कहीने शुं? शुं? एम बोलता, तथा अति आश्चर्य पामेला ते मन्त्रीना हाथमां चिंतामणि रत्न मूकीने ते दिव्यपुरुष आकाशमार्गे चाल्यो गयो. ॥ १७ ॥

इत्युक्त्वा किं किमित्युक्तेरुच्चैश्चित्रस्य मन्त्रिणः। पाणौ चिन्तामणिं मुक्त्वा स द्यां दिव्यनरोऽगमत्॥१८॥

अर्थः—पछी रोमांचित शरीरवाळो ते मंत्री कमलोवडे घणा वखतसुधी ते मणिने पूजीने, तथा पछी सैन्यनो समूह रचीने संध्या काळे (पोताना) नगर तरफ गयो. ॥ १८ ॥

अथाब्जैर्मणिमभ्यर्च्य रोमाञ्चितवपुश्चिरम् । विरचय्य चमूचक्रं सायं सोऽगात्पुरं प्रति ॥१९॥

अर्थः—पछी ते :मित्रानंदमंत्रीए हाथी, घोडा तथा रथोना समूह सहित डंकाओनी गर्जना करीने ते सैन्योथी ते नगरने घेरो घाल्यो ॥ १९ ॥

राजवाजिरथाभोगमग्ननिस्वाननिस्वनः । तैर्बलैर्वलयामास मित्रानन्दोऽथ तत्पुरम् ॥ २० ॥

अर्थः—आ नगरीने कोणे घेरो घाल्यो छे ? ए जाणवाने राजाए बातमीदारोने मोकल्या, तेओने जोइ मंत्रीए कह्युं के, ॥२०॥

कश्चकार पुरीरोधमिति बोधकृते नृपः । हेरिकान्प्रेरयामास तान्प्रेक्ष्य सचिवोऽब्रवीत् ॥२१॥

अर्थः—अरे ! भुजाबलना गर्वथी नष्ट थयेल छे. घणा भाग्योना समूहनी उत्पत्ति जेनी एवा ते राजाने तमारे मारा कहेवाथी एम कहेवुं के, ॥ २१ ॥

भुजागर्वपराभूतभूरिभाग्यभरोद्भवः । अये मद्वचसा वाच्यो भवद्भिरिति भूपतिः ॥ २२ ॥

अर्थः—पुण्यथी प्राप्त थयेल छे, सैन्यनो समूह जेने एवो ते मित्रानंद आवी पहोंच्यो छे, अने तुं तो पोताना पराक्रमथी जगतने पण दबावनारो छे, माटे तेनी साथे लडवाने बहार आव ? ॥ २२ ॥

पुण्याप्तसैन्यसंदर्भो मित्रानन्दः समागमत् । विक्रमाक्रान्तविश्वोऽसि संप्रहर्तुं बहिर्भव ॥२३॥

अर्थः—एम कहीने, तथा तेओने शिरपाव आपीने मंत्रिए मोकलेला ते बातमीदारोए पछी (त्यांथी) जइने राजाने सघळी खरेखरी हकीकत जणावी. ॥ २३ ॥

एवमाभाष्य संभूष्य प्रहिताः सचिवेन ते । गत्वा व्यज्ञपयन्राज्ञे सर्वमथ यथातथम्॥ २४ ॥

अर्थः-पछी ते चतुर राजा शांत थइने केटलाक माणसो सहित परवार्यो थको, मित्रानंद पोते रह्यो हतो, त्यां गयो ॥ २४ ॥

स्वस्थीभूयाथ भूजानिः कैश्चित्परिवृतो जनैः । कृती तत्र ययौ यत्र मित्रानन्दः स्वयं स्थितः॥२५॥

अर्थः— ते मंत्री आगळ राजाने जोइने उभो थयो, केमके सज्जनोनो फक्त नजरे देखवासुधीज इष्टजन मतेनो विरोध होय छे.

अभ्युत्तस्थौ तदा मन्त्री निर्भाल्य नृपतिं पुरः । इष्टे हि दर्शनं यावद्विरोधो युज्यते सताम् ॥२६॥

अर्थः—पछी प्रणामपूर्वक (मंत्रीए) राजाए सिंहासनपर बेसाडयो, त्यारे ते राजाए पण बलात्कारे पोताना अर्ध आसनपर ते मंत्रीने बेसाडीने कह्युं के ॥ २६ ॥

प्रणिपत्याथ पृथ्वीन्दुर्निष्कपीठे निवेशितः । बलादर्धासने स्वस्य सचिवं न्यस्य सोऽवदत् ॥२७॥

अर्थः—शौर्य आदिकना उद्यमथी पण पुण्यज उत्तम छे, केमके पुण्यशाळीओ पासे उद्यमवंतो नोकर थइने रहे छे, ॥२७॥

वरेण्यं पुण्यमस्त्येव शौर्यादिव्यवसायतः । पुण्यभाजां हि जायन्ते किंकरा व्यवसायिनः ॥२८॥

अर्थः—आ आखो सैन्यनो समूह (जे तमोने प्राप्त थयो ते खरेखर) तमारा पुण्यना उदयने सूचवनारो छे. के जेथी हुं तमारी पासे तमारो स्वामी छतां पण नोकर सरखो लागुं छुं. ॥२८॥

भवद्भाग्योदयः कश्चिदयमीदृक्चमूचयः । येनाहं तव भर्तापि भृत्यद्भवामि तेऽग्रतः ॥२९॥

किं त्वसावियती भूतिर्बभूव भवतः कुतः । इत्युक्तो भूभुजा मन्त्री स्वचरित्रमचीकथत्॥३०॥

अर्थः—परंतु तमोने आ आटली समृद्धि क्यांथी प्राप्त थइ एम राजाए पूछवाथी ते मंत्रीए पोतानुं वृत्तांत कही संभळाव्युं. ३०

अथ विस्मयविस्मेरनेत्रपत्रजनेक्षितः । मित्रानन्देन सानन्दः पृथ्वीन्दुः प्राविशत्पुरम् ॥३१॥

अर्थः—पछी आश्चर्यथी विकस्वर थयेलां नेत्रोवाळा लोकोथी जोवाएला ते राजा आनंदथी ते मित्रानंद मंत्रीसहित नगरमां दाखल थयो. ॥३१॥

उपायैः फलितं श्रीभिर्मणिमाहात्म्यतोऽधिकम् । ववृधे च नरेन्द्रेण मन्त्रिणो मैत्र्यमद्भुतम्॥३२॥

अर्थः—पछी ते मणिना प्रभावनी उद्यम अने लक्ष्मीथी अधिक फलद्रूप थयेली ते राजासाथेनी मंत्रनी मित्राइ आश्चर्यकारक रीते वृद्धि पामवा लागी. ॥३२॥

कदापि भानुभूपेन सहोत्तंसितसंसदम् । आरादारामिकोऽभ्येत्य तं धर्मज्ञं व्यजिज्ञपत् ॥ ३३ ॥

अर्थः—पछी एक दिवसे ते भानुराजासहित राजसभाने शोभावता एवा ते धर्मिष्ट मंत्रीनी पासे वनरक्षक मालीए तुरत आवीने कह्युं के, ॥३३॥

दिष्टयाद्य वर्धसे स्वामिन्नङ्गी धर्म इवागमत् । मुनिः सुमन्धरो नाम ज्ञानी लीलावनीं तव ॥३४॥

अर्थः—हे स्वामी ! आजे (हुं आपने) आनंदथी वधामणी आपुं छुं के, देहधारी धर्मसरखा सुमंधर नामना ज्ञानीमुनि आपना क्रीडाबनमां पधार्या छे. ॥३४॥

प्रीत्याथ तस्मै दत्त्वाङ्गभूषणानि क्षणेन सः । जगामारामजगतीं जगतीपतिना समम् ॥३५॥

अर्थः—तेज वखते आनंदथी तेने शरीरपरना आभूषणो आपीने क्षणवारमांज ते मित्रानंदमंत्री राजासहित ते बगीचानी भूमिमां गयो. ॥३५॥

मुनिं नेत्रामृतं नेत्रैरापीय नृपमन्त्रिणौ । नत्वाथ न्यविशेतां तौ पातुं कर्णामृतं वचः ॥३६॥

अर्थः—पछी ते राजा तथा मंत्री, नेत्रोने अमृतसमान एवा ते मुनिराजने नेत्रोवडे जोइने, तथा नमीने, कर्णोमां अमृत समान, एवी तेमनी वाणी सांभळवाने बेठा. ॥३६॥

मुनीशं देशनान्तेऽथ पप्रच्छ पृथिवीपतिः । धन्यस्य कथमस्यामन्विपत्कालेऽपि संपदः॥३७॥

अर्थः—पछी धर्मदेशनाने अंते राजाए ते मुनिराजने पूछयुं के, आ भाग्यशाली मंत्रीने आपत्तिसमये पण संपदा केम प्राप्त थइ? ३७

अथाचष्ट मुनिः स्पष्टविभवा भुवि भाति पूः । धन्यभारच्युतेव द्यौः पद्मनेत्रेति विश्रुता॥३८॥

अर्थः—त्यारे ते मुनिराजे कह्युं के, प्रगट वैभवाळी, तथा भाग्यशालीओना भारथी जाणे नीचे आवी पडी होय नही! एवी देवलोकसरखी "पद्मनेत्रा" नामनी प्रसिद्ध नगरी पृथ्वीपर शोभे छे. ॥३८॥

तत्रादित्य इति क्ष्मापस्तत्प्रसादास्पदं धनी । श्रेष्ठी सुदत्त इत्यासीज्जिनधर्मधुरन्धरः ॥ ३९ ॥

अर्थः— ते नगरीमां आदित्यनामनो राजा हतो, ते राजानी कृपाना स्थानरूप, तथा जैनधर्मीओमां अग्रेसर सुदत्तनामे धनवान शेठ हतो. ॥३९॥

सोऽन्यदा पापरोगाणामौषधं पौषधं श्रितः । तस्थौ निशि निशान्तेऽसौ शान्तेन मनसा रसात् ॥४०॥

अर्थः—एक दिवसे ते शेठे पापोरूपी रोगो मटाडवाने औषधसरखा रात्रिपौषधनो स्वीकार कर्यो, अने रात्रिने छेडे ते आनंदथी शांत चित्ते रह्यो. ॥४०॥

तदा कश्चिदवस्वापविद्यावेदी तदोकसि । भूरिभीमपरीवारः प्राविशत्तस्कराग्रणीः ॥ ४१ ॥

अर्थः—ते वखते तेना घरमां अवस्वापिनी विद्या जाणनारो, तथा घणा भयंकर परीवारवाळो कोइक म्होटो चोर दाखल थयो. ४१

विद्या चौरस्मृता लोकं तत्रामूर्छयताखिलम् । सुदत्ते सा नमस्कारमन्त्रध्याने तु नास्फुरत् ॥४२॥

अर्थः—पछी ते चोरे याद करेली विद्याए त्यांना सर्व लोकोने मूर्छित कर्या, परंतु नवकारमंत्रना ध्यानमां रहेला सुदत्तशेठपर ते विद्याए असर करी नही. ॥४२॥

तं पश्यन्तमपश्यन्त एकान्तस्थं मलिम्लुचाः । जगृहुस्तद्गृहद्रव्याण्यखिलान्यस्खलन्मुदः ॥४३॥

अर्थः—एकांतमां रहेला, तथा जोता एवा ते शेठने नही जोता एवा ते चोरोए अत्यंत हर्षित थइने तेना घरमांथी सघळुं द्रव्य ग्रहण कर्युं. ॥४३॥

द्रागभञ्जन्ति स्म मञ्जूषाः कपाटौघमपाटयन् । द्रव्याय स्फोटयामासुरमी भूमिगृहाण्यपि ॥ ४४ ॥

अर्थः—तेओ तुरत पेटीओ भांगवा लाग्या, कमाडोनोसमूह तोडी पाडवा लाग्या, तथा द्रव्य मेळववा माटे भोंयरांओ पण खोलवा लाग्या. ॥४४॥

**अहो महात्मनस्तस्य धर्मावष्टम्भयन्त्रितम् । जातेऽप्युत्पातजातेऽस्मिन्न ध्यानाचलितं मनः ॥४५॥**

अर्थः-अहो! आवो सघळो उत्पात थया छतां पण ते महात्मानुं धर्मना आलंबनमां आसक्त थयेलुं मन ध्यानथी चलायमान थयुं नही. ॥ ४५ ॥

**अनागतेष्वथागत्य गृह्णत्सु धनपद्धतीः । तेषु यातेषु च ध्यानभेदोऽभूत्तस्य न क्वचित् ॥ ४६ ॥**

अर्थः—वळी ते चोरोना आव्या पहेलां, आवीने धनश्रेणी लेतां, तथा ते लेइने गयाबाद पण ते शेठना ध्यानमां कोइपण रीते भंगाण थयुं नही ॥ ४६ ॥

**जने शोचत्यथोन्निद्रे धननाशं निशात्यये । व्यलसद्दिनकृत्येषु श्रेष्ठी पारितपौषधः ॥ ४७ ॥**

अर्थः-पछी रात्री वीत्याबाद जागेलां (घरना) माणसो द्रव्यना नाश माटे शोक करवा लाग्यां, त्यारे ते शेठ तो पौषधपारीने [पोताना] नित्यकार्योमां जोडाइ गया. ॥ ४७ ॥

**क्रमादर्जयतो भाग्यभङ्गीसङ्गीकृतात्मनः । धनधोरणयस्तस्य भूरयोऽप्यभवन्पुनः ॥ ४८ ॥**

अर्थः—भाग्योनी श्रेणिमां जोडेलो छे आत्मा जेणे, एवा ते शेठने अनुक्रमे व्यापार करतां थकां फरीने पाछी घणी धननी श्रेणिओ प्राप्त थइ. ॥४८॥

**स कदाचिदवस्वापविद्याविद्वौरचक्रराट् । एकं तल्लोप्त्रतो हारं विक्रेतुं प्राप तां पुरीम् ॥४९॥**

अर्थः—पछी एक दिवसे अवस्वापिनी विद्याने जाणनारो ते चोरशिरोमणि ते चोरेली वस्तुओमांथी एक हार वेचवामाटे ते

नगरीमां आव्यो. ॥४९॥

तं हारं श्रेष्ठिनस्तस्य वणिक्पुत्रो धनाभिधः । उपलक्ष्यार्पयामास तलारक्षाय तस्करम् ॥५०॥

अर्थः—त्यारे धननामना एक वणिकपुत्रे (वाणोतरे) शेठनो ते हार ओळखीने ते चोरने कोटवाळने सोंपी दीधो, ॥५०॥

तद्विज्ञाय द्रुतं गत्वा श्रेष्ठी तत्र कृपामयः । स्वं वणिक्पुत्रमाक्षिप्य तलारक्षमदोऽवदत् ॥ ५१ ॥

अर्थः-ते हकीकत जाणीने ते दयाळु शेठे तुरत त्यां जइने, तथा पोताना ते वाणोतरने धमकावीने, कोटवाळने एम कह्युं के,॥५१

धनोऽयं नैव जानाति चौरव्यतिकरात्पुरा । अस्मै महात्मने मूल्यान्मया हारोऽयमर्पितः ॥ ५२ ॥

अर्थः-आ धनने कइ खबरज नथी, केमके चोरी थया पहेलांज में आ महात्माने आ हार किम्मत लेइ वेचातो आप्यो छे.॥५२॥

तदयं मुच्यतां मास्मिन्नुच्यतां चौर्यदुर्यशः । रोहिणीयोगमात्रात्किं स्यात्कलङ्कीन्दुवद्रविः ॥ ५३ ॥

अर्थः—माटे आने छोडीद्यो? अने तेनाप्रते चोरीनो अपजश न बोलो? केमके फक्त रोहिणीना योगथी सूर्य शुं चंद्रनीपेठे कलंकीत थइ शके? ॥५३॥

द्वादशव्रतधर्तायं नासत्यं वदतीत्यथ । सुदत्तवचसामुश्चत्तलारक्षो मलिम्लुचम् ॥ ५४ ॥

अर्थः-हवे बार व्रतो धारण करनारो आ सुदत्त जूठुं बोले नही, एम विचारी ते सुदत्तना वचनथी कोटवाळे ते चोरने छोडीमेल्यो.

असत्यमपि तत्सत्यं यत्प्राणिहितमित्यसौ । असत्ययापि वाचामुं श्रेष्ठी चौरममूमुचत् ॥ ५५ ॥

अर्थः—असत्य छतां पण जे प्राणिओने हितकारी छे ते सत्य छे, एम विचारी असत्य वचनथी पण शेठे ते चोरने छोडाव्यो.

श्रेष्ठी तं भोजयित्वा च वरे दत्त्वा च चीवरे । नाकृत्येषु मतिः कृत्येत्युक्त्वा च प्राहिणोत्कृती॥५६॥

अर्थः—वळी ते चतुर शेठे तेने भोजन करावीने, तथा बे उत्तम वस्त्रो आपीने, (हवे पछी) अकार्यो करवामां बुद्धि करवी नही एम कही रवाना कर्यो. ॥५६॥

श्रेष्ठीन्दोरुपकारेण शिक्षया च द्रवन्मनाः । किं स्यादकृत्यमित्येष विज्ञातुं धारयन्धियम् ॥ ५७ ॥

निर्यन्पुराद्बहिर्भागभूमौ शुभ्रप्रभाभिधम् । धर्मोपदेशान्ददतं मुनिराजमलोकत ॥ ५८ ॥

अर्थः—ते उत्तम शेठे करेला उपकारथी, तथा तेमनी शिखामणथी कोमळ हृदयवाळा थएला ते चोरे "अकार्य शुं होय?" ए जाणवाने बुद्धि धारण करतां थकां, ॥ ५७ ॥ नगरमांथी निकळीने बहारनी भूमिना भागमां धर्मनो उपदेश देता शुभ्रप्रभनामना मुनिराजने जोया. ॥५८॥

श्रुत्वा तद्देशनां ज्ञातकृत्याकृत्यविवेचनः । मुनीन्दोस्तस्य पादान्ते दीक्षां दक्षोऽग्रमग्रहीत् ॥५९॥

अर्थः—तेमनो उपदेश सांभळीने जाणेल छे कार्य आकार्यनो विवेक जेणे एवा ते चतुर चोरे ते मुनिराजनी पासे दीक्षा लीधी. ५९

चारित्रं शुद्धमासेव्य सौऽधर्मोसै सुरोऽभवत् । सुदत्तस्तु विपद्यायमभवत्सचिवस्तव ॥ ६० ॥

अर्थः—पछी ते शुद्ध चारित्र पाळीने सौधर्म देवलोकमां देव थयो, अने ते सुदत्त पण मरण पामीने आ तारो मंत्री थयो. ॥६०॥

संपत्सु ह्रियमाणासु यद्बभञ्ज न पौषधम् । पदे पदे तदत्रायं विचित्राः प्राप संपदः ॥ ६१ ॥

अर्थः—संपत्ति चोराया छतां पण (तेणे) पौषधव्रत भांग्युं नही, तेथी अहीं पगले पगले ते विविध प्रकारनी संपदा पाम्यो. ॥६१॥

स तु चौरः सुरीभूतः स्मरन्नुपकृतीः कृती । चिन्तार्ताय ददौ रत्नं प्रस्तावं प्राप्य मन्त्रिणे ॥६२॥

अर्थ–देवभव पामेला ते कृतज्ञ चोरे पण उपकारने याद करीने प्रसंग मेळवी आ चिंतातुर थयेला मंत्रीने रत्न आप्युं. ॥६२॥

प्रभो द्रक्ष्यति तं मन्त्रीत्युक्ते राज्ञा मुनिर्जगौ । मन्त्रिणो जीवितान्ते तद्दर्शनं भावि मुक्तये ॥६३॥

अर्थः—हे भगवन्! ते देवने मंत्री शुं जोइ शकशे? एम राजाए कहेवाथी ते मुनिए कह्युं के मंत्रिना जीवने अंते मोक्ष मेळववामां साधनरूप ते देवनुं तेने दर्शन थशे. ॥६३॥

यतो नन्दीश्वरे देवान्नन्तुमस्याभिलाषिणः । समयज्ञसुरानीतविमानस्थस्य गच्छतः ॥ ६४ ॥

शुद्धध्यानलयस्यान्तकृतकेवलितायुजः । लवणाब्धेरुपर्येवं मुक्तिर्भूप भविष्यति ॥ ६५ ॥

अर्थः–हे राजन्! केमके नंदीश्वर द्वीपमां रहेली (तीर्थंकरप्रभुओनी शाश्वती प्रतिमाओने) वांदवानी इच्छावाळा, तथा समयने जाणनारा ते देवे लावेलां विमानमां बेसीने जता, ॥ ६४ ॥ अने निर्मल ध्यानमां रहेला, तथा अंतकृत केवलिपणुं पामेला आ मंत्रीनो लवणसमुद्र उपरज मोक्ष थशे. ॥६५॥

इत्याकर्ण्य मुनेर्वाचमुदश्चद्धर्मबुद्धयः । सर्वेऽप्युर्वीश्वराद्यास्ते सानन्दा मन्दिराण्ययुः ॥ ६६ ॥

अर्थः–एरीतनी मुनिनी वाणी सांभळीने प्रगट थयेली धर्मबुद्धिवाळा, राजाआदिक तेओ सघळा आनंद सहित [पोतपोताने] स्थानके गया. ॥६६॥

एवं प्राक्पुण्यपूर्णर्द्धिमित्रानन्दनिदर्शनात् । भजन्तु भवपेषाय पौषधे सुधियो धियम् ॥ ६७ ॥

अर्थः–एरीते पूर्वे करेलां पुण्यथी मळेली समृद्धिवाळा मित्रानंद मंत्रिना उदाहरणथी उत्तम बुद्धिवानोए संसारनुं छेदन करवा-माटे पौषध व्रतमां बुद्धिने धारण करवी. ॥६७॥

इति पौषधव्रतविचारे मित्रानन्दकथा. ॥

एरीते पौषधव्रतविचार उपर मित्रानंदनी कथा कही.

आ चरित्र श्रीवर्धमानसूरिए रचेला वासुपूज्यचरित्रमांथी ओधरीने तेनुं गुजराती भाषांतर करी छपावी प्रसिद्ध करेल छे.

अर्थः–एरीतनी राजानी आज्ञा जाणीने ते मंत्रीश्वर पण अत्यंत आवेशमां आवीने एकलोज परदेशप्रते चाली निकळ्यो. ॥१२॥

आ चरित्रमां पृष्ट ३ मां श्लोक १२नो अर्थ रहीजतां नीचे प्रमाणे वांचवो अने १२ श्लोकनो जे अर्थ छापेल छे ते १३मा श्लोकनो समजवो एम अनुक्रम २९ श्लोक सुधी समजवो पाना ६ सुधी फेर छपायेल छे. त्यार पछी बराबर छे.

इति श्रीमित्रानंदमंत्रिचरित्रं समाप्तम्